श्रीमते रामानुजाय नमः

**श्री शङ्कर भगवत्पाद विरचितम्**

# ॥ श्री हनुमत् पञ्चरत्नम् ॥

वीताखिल विषयेच्छं जातानन्दाश्र पुलक मत्यच्छम्।
सीतापति दूताद्यं वातात्मज मथ्य भावये हृद्यम्॥ १

तरुणारुण मुखकमलं करुणारस पूर पूरितापाङ्गम्।
सञ्जीवन माशासे मञ्जुल महिमानं अञ्जना भाग्यम्॥ २

शम्बर वैरि शरातिगमम्बुजदल विपुल लोचनोतारम्।
कंबुकलामनिलदिष्टं बिम्बज्वलितोष्ठं कमवलम्पे॥ ३

दूरिकृत सीतार्त्तिः प्रकटीकृत रामवैभव सपूर्त्तिः।
दारित दशमुख कीर्त्तिः पुरतो मम भातु हनुमतो मूर्त्तिः॥ ४

वानर निकराध्यक्षं दानवकुल कुमुद रविकर सदृक्षम्।
दीनजनावन दीक्षं पवनतपः पाक पुञ्जमद्राक्षम्॥ ५

एतत् पवनसुतस्य स्तोत्रं यः पठति पञ्चरत्नाख्यम्।
चिरमिह निखिलान् भेगान् भुक्त्वा श्रीरामभक्ति भाग्भवति॥ ६

**॥ इति श्री हनुमत् पञ्चरत्नं सम्पूर्णम् ॥**